हालाहली, स्त्री, मदिरा । इति राजनिर्घण्टः ॥
हालिकः, त्रि, हलेन खनति यः । (हलस्यायमिति वा हल +"हलसीरात् ठक् ।" ४।३।१२४ । इति ठक् ) हलस्य वोढा । हलसम्बन्धी। तत्पर्य्यायः । सैरिकः २ । इत्यमरः ।२।८।६४॥ (यथा, वक्रोक्तिपञ्चाशिकायाम् । २ ।
"त्वं हालाहलभृत्करोषि मनसो मूर्च्छां ममा-
लिङ्गितो
हालां नैव बिभर्षि नैव च हलं मुग्धे ! कथं
हालिकः ।
सत्यं हालिकतैव ते समुचिता मत्तस्य गोवाहने
वक्रोक्त्येति जितो हिमाद्रिसुतया स्मेरो हरः
पातु वः ॥")
हालिनी, स्त्री, स्थूलपत्नी । इति हेमचन्द्रः ॥
हाली, स्त्री, कनिष्ठा श्यालिका । इति हेमचन्द्रः ॥
हासुः, पुं, ( हस्यतेऽनेनेति । हस + उण् । इत्यु-णादिवृत्तौ उज्ज्वलः । १ । १ । ) दन्तः । इति त्रिकाण्डशेषः ॥
हावः, पुं, (ह्वे + घञ् ।) आह्वानम् । इति जटाधरः ॥ स्त्रीणां शृङ्गारभावजाः क्रियाः । यथा,
"स्त्रीणां विलासविब्बोकविभ्रमा ललितं तथा।
हेला लीलेत्यमी हावाः क्रियाः शृङ्गार-
भावजाः ॥"
इत्यमरः । १ । ७ । ३१ ॥
स्त्रीणां विलासादयः शृङ्गारभावजाः क्रियाः हावशब्देनोच्यन्ते । क्रियाः चेष्टाः । शृङ्गारभावो रतिः तत्र जाताः शृङ्गारभावजाः । ह्वयन्ते रागिणोऽत्र हावः ह्वेञ् स्पर्द्धने आधारे घञ् । ह्वयन्ते रागिनः कामात्मावनेनेति करणे वा घञ् । यदुक्तम् ।
"युवानोऽनेन ह्वयन्ते नारीभिर्म्मदनानले ।
अतो निरुच्यते हावस्ते विलासादयो मताः ॥"
इति ।
हा कष्टं वयति शोषयतीति वै शोषे इत्यस्मात् ड वा । यदाह भरतः ।
"अलङ्कारास्तु नाट्यज्ञैर्ज्ञेया भावरसाश्रयाः ।
यौवनेऽभ्यधिकाः स्त्रीणां विकारा वक्त्रगात्रजाः ॥"
तथा ।
"लीला विलासो विच्छित्तिर्विभ्रमः किल-
किञ्चितम् ।
मोट्टायितं कुट्टमितं विब्बोको ललितं तथा ।
विकृतञ्चेति मन्तव्या दश स्त्रीणां स्वभावजाः ॥"
इत्यमरभरतौ ॥ * ॥
तल्लक्षणं यथा,—
"ग्रीवारेचकसंयुक्तो भ्रूनेत्रादिविकासकृत् ।
भावादीषत्प्रकाशो यः स हाव इति कथ्यते ॥"
इत्युज्ज्वलनीलमणिः ॥
हासः, पुं, (हस + घञ् ।) हास्यम् । इत्यमरः । १ । ७ । १८ ॥ (यथा, रघुः । १२ । ३६ ।
"संरम्भं मैथिलीहासः क्षणसौम्यां निनाय-
ताम् ।
निवातस्तिमितां वेलां चन्द्रोदय इवोदधेः ॥" )
विकाशः । यथा, भट्टिः । २ । १ ।
"दिग्भागतैः सौरभवैः समस्ति
निशां विलोक्यापहृतां पयोभिः ।
कुशानि सामर्षतयेव तेनुः
सरोजलक्ष्मीं स्थलपद्महासैः ॥")
हासाः, [ स् ] पुं, ( जहाति शीतकिरणमिति । हा + "वहिहाधाञ्भ्यश्छन्दसि ।" उणा० ४ । २२० । इति असुन् । तस्य णुट् च । ) चन्द्रः । वैदिकशब्दोऽयम् ॥
हासिका, स्त्री, हास्यम् । इति हेमचन्द्रः ॥
हास्तिकं, क्ली, ( हस्तिनां समूहः । हस्तिन् + "अचित्तहस्तिधेनोष्ठक् ।" ४ । २ । ४७ । इति ठक् । ) हस्तिसमूहः । इत्यमरः । २ । ८ । ३६॥ ( यथा, महाभारते । ८ । ४८ । १० ।
"दत्त्वा च दानं विविधं नानारत्नसमन्वितम् ।
सगोहास्तिकदासीकं साजावि गतवान् वनम् ॥"
हस्तिना चरतीति । "चरति ।" ४ । ४ । ८ । इति ठक् । ) हस्त्यारोहे, त्रि ॥
हास्तिनं क्ली, ( हस्तिना नृपेण निर्वृत्तमिति । हस्तिन् + अण् । ) हस्तिनापुरम् । इति त्रिकाण्डशेषः । (हस्ती प्रमाणमस्य । हस्तिन् + "पुरुषहस्तिभ्यामण् च ।" ५ । २ । ३८ । इति अण् । ) गजपरिमाणे हस्तिहस्तिसम्बन्धिनि च त्रि ॥
हास्तिनपुरं, क्ली, ( हास्तिनं पुरम् । ) हस्तिनापुरम् । इति हेमचन्द्रः ॥ ( यथा, महाभारते । ८ । ३५ । ६ ।
"स गत्वा हास्तिनपुरं धृतराष्ट्रं समेत्य च ।
उक्तवान् वचनं तथ्यं हितञ्चैव विशेषतः ॥")
हास्यं, क्ली, ( हस + ण्यत् । ) रसविशेषः । स च कौतुकोद्भवम् । तत्पर्य्यायः । हासः २ हसः ३ । इत्यमरः । १ । १ । १८ ॥ हसनम् ४ घर्घरः ५ हासिका ६ । इति हेमचन्द्रः ॥ * ॥ अथ हासः ।
"विकृताकारवाग्वेशचेष्टादेः कुतुकाद् भवेत् ।
हास्यो हासः स्थायिभावः श्वेतः प्रमथदैवतः ॥
विकृताकारवाक्चेष्टं यदालोक्य हसेज्जनः ।
तदत्रालम्बनं प्राहुः तच्चेष्टोद्दीपनं मतम् ॥
अनुभावोऽक्षिसङ्कोचवदनस्मेरतादिकः ।
निद्रालस्यावहित्थाद्या अत्र स्युर्व्यभिचारिणः ॥
ज्येष्ठानां स्मितहसिते मध्यानां विहसिता-
वहसिते च ।
नीचानामपहसितं तथातिहसितञ्च षड्भेदाः ॥
ईषद्विकासि नयनं स्मितं स्यात् स्पन्दिताधरम् ।
किञ्चिल्लक्ष्यद्विजं तत्र हसितं कथितं बुधैः ॥
मधुरस्वरं विहसितं सांसशिरःकम्पमवहसितम् ।
अपहसितं सास्राक्षं विक्षिप्ताङ्गं भवत्यतिह-
सितम् ॥"
यथा मम ।
"गुरोर्गिरः पञ्च दिनान्यधीत्य
वेदान्तशास्त्राणि दिनत्रयञ्च ।
अमी समाघ्राय च तर्कवादान्
समागताः कुक्कुटमिश्रपादाः ॥"
अस्य नाटकमेलकप्रभृतिषु परिपोषो द्रष्टव्यः अत्र च ।
"यस्य हासः स चेत् क्वापि साक्षान्नैव निबध्यते
तथाप्येष विभावादिसामर्थ्यादुपलभ्यते ॥
अभेदेन विभावादि साधारण्यात् प्रतीयते ।
सामाजिकैस्ततो हास्यरसोऽयमनुभूयते ॥"
एवमन्येष्वपि रसेषु द्रष्टव्यम् । इति साहित्य-दर्पणे ३ परिच्छेदः ॥ * ॥ तस्य शुभाशुभलक्षणं यथा,—
"अकम्पं हसितं श्रेष्ठं मीलिताक्षमथापरम् ।
अनल्पहसितं दुष्टेत् तत् सोन्मादस्य नैकधा ॥"
इति गारुडे । ६५ । ३१ अध्यायः ॥
( हासयोग्ये, त्रि । यथा रघुः । २ । ४१ ।
संरुद्धचेष्टस्य मृगेन्द्र ! कामं
हास्यं वचस्तद्यदहं विवक्षुः ॥")
हाहलं, क्ली, हलाहलविषम् । इति शब्दरत्नावली ॥
हाहाः, [ स् ] पुं, देवगन्धर्व्वविशेषः । इत्यमरटीकायां भरतः ॥
हाहाः, पुं, देवगन्धर्व्वविशेषः । यथा,—
"हाहा हूहूश्चैवमाद्या गन्धर्व्वास्त्रिदिवौकसाम् ॥"
इत्यमरः । १ । १ । ५५ ॥
देवतानां हाहाहूहूविश्वावसुतुम्बुरुचित्ररथप्रभृतयो गन्धर्व्वशब्दवाच्याः । हवाख्योपात्तकहूहूवत्सम्बन्धः । अव्युत्पन्नोऽयं हाहाशब्दः । हाइति शब्दं जहातीति वाहमिति हाको विच् इत्येवं व्युत्पत्तौ तु प्रसाधयति चौरादीपोऽप्यघावित्यालोपः स्यात् । अपि प्रत्यये हाहः- शब्दस्य सान्तोऽपि । गन्धर्व्वा हाहसि प्रोक्ता गन्धर्व्वा गायनेऽपि च । इति शाश्वतः । गन्धर्व्व पीतिहाहसोरिति वाचस्पतिः । हाहाशब्दोऽपि दृश्यते । हंसो हाहा हूहू च रौ हयचर्य्यव तुम्बुरुरिति व्याड़िप्रभृतयः । इति भरतः ॥ * ॥ विस्मयशब्दे शोकशब्दे च अव्य । यथा,—
"ततो हाहा कृतं सर्व्वं दैत्यसैन्यं ननाश तत् ॥
प्रहर्षञ्च परं जग्मुः सकला देवतागणाः ॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्ये । ३ । ४० ॥
हाहाकारः, पुं, ( हाहा इत्यव्ययशब्दस्य कारः करणम् ।) युद्धकलरवः । इति केचित् ॥ (यथा, महाभारते । १ । १८ । १६ ।
"हाहाकारः समभवत्तत्र तत्र ततस्ततः ।
अन्योन्यं छिन्दतां शस्त्रैरादित्ये लोहितायति ॥"
शोकध्वनिः । यथा,—
"उदग्रो विकटो वायुः करालो वात्ययान्वितः ।
देशहृच्चलतानाञ्च हाहाकाराय कथ्यते ॥"
इति ज्योतिषे वायुफलम् ॥
हाहालं, क्ली, विषम् । इति शब्दरत्नावली ॥
हि, न वर्द्धने । गतौ इति कविकल्पद्रुमः । (स्वा०-पर०-सक०-अनिट् ।) गतिरिह मन्तर्भूतण्यर्थत्वात् गतिप्रेरणम् । न, प्रहिणु खहनुमिति भट्टिः । वर्द्धने विरलप्रयोगः । इति दुर्गादासः ॥